# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा - - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य-१** | **प्रश्नपत्रम् – २** | **गुणाः - ५०** |
| **विषयः – सर्वदर्शनम्** | **सत्रम् - २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – योगसूत्रम् (द्वितीयतृतीयपादौ)** | |

सूचना – (i) निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्च प्रश्ना विधेयाः।

(ii) प्रत्येकं प्रश्नस्य अङ्काः समानाः सन्ति। (१०)

प्रश्नः – १ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) त्रयमेकत्र संयमः।

(२) सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः।

(३) शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी।

प्रश्नः – २ चित्तस्य त्रिविधं परिणामं यथाभाष्यम् उपपादयत।

प्रश्नः – ३ संयमजयात् कासां सिद्धीनां प्राप्तिः भवति इति यथाभाष्यं निरूपयत।

प्रश्नः – ४ धर्मलक्षणावस्थापरिणामान् यथाभाष्यं प्रतिपादयत।

प्रश्नः – ५ द्विविधं कर्म यथाग्रन्थं प्रतिपादयत।

प्रश्नः – ६ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम्।

(२) भुवनज्ञानं सूर्ये संयमात्।

(३) सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति।

प्रश्नः – ७ पातञ्जलयोगदर्शनस्य तत्त्वमीमांसां लिखत।

प्रश्नः – ८ कैवल्यपादस्य सारांशं स्वशब्दैः निबध्नीत।

प्रश्नः – ९ समाधिजाः सिद्धीः यथाभाष्यम् उपवर्णयत।

प्रश्नः – १० चतुष्पदीं कर्मजातिं निरूप्य तस्याः विपाकफलं वर्णयत।

प्रश्नः – ११ अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत ।

(१) का नाम धारणा?

(२) किं नाम ध्यानम्?

(३) को नाम समाधिः?

(४) प्रज्ञालोकः कस्मात् भवति?

(५) भूतेन्द्रियेषु कति परिणामाः भवन्ति?

(६) को नाम धर्मी?

(७) अतीतानागतज्ञानं कस्मात् भवति?

(८) किं नाम कर्म?

(९) सूर्ये संयमात् कस्य ज्ञानं भवति?

(१०) तपसि लोके देवनिकायः?

(११) मूर्धज्योतिषि संयमात् कस्य दर्शनं भवति?

(१२) अणिमादिसिद्धयः कति सन्ति?

(१३) आस्तिकदर्शनानि कति सन्ति?

(१४) योगसूत्रकारः कः?

(१५) योगस्य कति अङ्गानि सन्ति?

***